| | | | |
|---|---|---|---|
| कन्दः, | कन्दः, | चिकन्दिषः, | चाकन्दः ; |
| कन्दितुम् , | कन्दयितुम् , | चिकन्दिषितुम् , | चाकन्दितुम् ; |
| कन्दा, | कन्दना , | चिकन्दिषा, चिकन्दयिषा, | चाकन्दा ; |
| कन्दनम् , | कन्दनम् , | चिकन्दिषणम् , | चाकन्दनम् ; |
| कन्दित्वा, | कन्दयित्वा, | चिकन्दिषित्वा, | चाकन्दित्वा ; |
| सङ्कन्द्य, | संकन्द्य, | सञ्चिकन्दिष्य, | सञ्चाकन्द्य ; |
| कन्दम् २ कन्दित्वा २ | कन्दम् २ कन्दयित्वा २ | चिकन्दिषम् २ चिकन्दिषित्वा २ | चाकन्दम् २ चाकन्दित्वा २. |

(164) " कदि वैक्लब्ये " (I-भ्वादिः-772. अक. सेट्. आत्म.)

[A]घटादिः षित् च ।

' आह्वाने रोदने क्रन्देः कन्देः क्रन्दति कन्दति ।
वैक्लव्ये तु तयोर्धात्वोः क्रन्दते कन्दते मितोः ॥
मित्त्वार्थपाठसामर्थ्यात् तयोर्दीर्घविकल्पनम् ।
भवेच्चिण्णमुलोस्तस्मादक्रान्द्यक्रन्दि सिध्यतः ॥ '

(श्लो-105-106.) इति देवः ।

' कदि आह्वाने रोदने च ' (163) इति धातोरेव, अर्थविशेषे आत्मनेपदार्थं मित्त्वार्थं चानुवादो घटादौ ॥

कन्दकः-न्दिका, कन्दकः-न्दिका, चिकन्दिषकः-षिका, चाकन्दकः-न्दिका ;
कन्दिता-त्री, कन्दयिता-त्री, चिकन्दिषिता-त्री, चाकन्दिता-त्री ;
— कन्दयन्-न्ती, कन्दयिष्यन्-न्ती-ती ; —
कन्दमानः, कन्दयमानः, चिकन्दिषमाणः, चाकन्द्यमानः ;
कन्दिष्यमाणः, कन्दयिष्यमाणः, चिकन्दिषिष्यमाणः, चाकन्दिष्यमाणः ;
कन्-कन्दौ-कन्दः ; — — —
कन्दितं-तः, [1]कन्दितः-तम् , चिकन्दिषितः, चाकन्दितः-तवान् ;
कन्दः, कन्दः, चिकन्दिषुः, चिकन्दयिषुः, चाकन्दः ;

---

1. ' निष्ठायां सेटि ' (6-4-52) इति णेर्लोपः ।

A. ' घटादिषु त्विहापूर्वपठितास्सर्वदा मितः । बहिस्स्थस्येह पाठे तु मित्त्वमुक्तेऽर्थ एव हि ' ॥ (धातुकाव्यव्याख्याने) इत्यनेन न्यायेन वैकल्ये एव मित्त्वप्रयुक्तं कार्यम् । आह्वानरोदनयोस्तु मित्त्वं न ।